तोयधिप्रियं, क्ली, ( प्रीणातीति । प्री+"इगुपधेति ।" ३।१।१३५। इति कः । तोयधिः प्रियो यस्य । ) लवङ्गम् । इति शब्दचन्द्रिका ॥

तोयनिधिः, पुं, ( तोयानि निधीयन्तेऽत्र । नि+धा+किः । तोयानां निधिर्वा । ) समुद्रः । इति शब्दरत्नावली ॥ ( यथा, कुमारे । १ । १ ।

"पूर्व्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥")

तोयपिप्पली, स्त्री, ( तोये जले पिप्पलीव । ) काँचड़ा इति ख्यातजलजशाकभेदः । तत्पर्य्यायः । लाङ्गली २ शारदी ३ शकुलादनी ४ । इत्यमरः । २ । ४ । १११ ॥

तोयपुष्पी, स्त्री, ( तोयेन बहुजलप्रदानेन पुष्पाणि यस्याः । ) पाटलावृक्षः । इति शब्दमाला ॥

तोयप्रसादनं, क्ली, ( प्रसादयतीति । प्र+सद्+णिच्+ल्युः । तोयस्य प्रसादनम् । अस्य फलयोगेन जलस्य निर्म्मलत्वं भवतीति तथात्वम् ।) कतकम् । इति भूरिप्रयोगः ॥

तोयप्रसादनफलं, क्ली, ( तोयप्रसादनस्य तोयप्रसादनाय वा फलम् । ) कतकफलम् । इति रत्नमाला ॥

तोयफला, स्त्री, ( तोयप्रधानं फलं यस्याः । ) इर्व्वारुः । इति राजनिर्घण्टः ॥

तोयवल्ली, स्त्री, (तोये जलप्रधानस्थाने वल्ली लतासन्ततिर्यस्याः । ) कारवेल्लः । इति रत्नमाला ॥ उच्छे इति भाषा ॥

तोयशुक्तिका, स्त्री, ( तोयजाता शुक्तिका । शाकपार्थिवादिवत् समासः । ) जलशुक्तिः । इति राजनिर्घण्टः ॥

तोयसूचकः, पुं, ( तोयं जलवर्षणं सूचयति रवेणेति । सूच्+ण्वुल् । ) भेकः । इति शब्दार्थकल्पतरुः ॥

तोयाधिवासिनी, स्त्री, ( तोयं जलप्रधानस्थलं अधिवसतीति । अधि+वस+णिनिः । यद्वा, तोयेन अधिवास इव संस्कारोऽस्यस्येति । इनिः । ) पाटलावृक्षः । इति रत्नमाला ॥ तोयादिवासिन्यपि पाठः ॥ ( पाटलाशब्देऽस्या विवृतिर्ज्ञातव्या ॥ )

तोरणं, क्ली, ( तोलयति उन्नमयति मस्तकमिति । तुल+ल्युः । लस्य रः । ) कन्धरा । कण्ठी । इति हारावली । १७४ ॥

तोरणः, पुं क्ली, ( तुतोर्त्ति त्वरया गच्छत्यनेनेति । तुर त्वरणे + करणे ल्युट् । ) बहिर्द्वारम् । इत्यमरः । २ । २ । १६ ॥ ( यथा, कुमारे । ७ । ३ ।

"भासोज्ज्वलत्काञ्चनतोरणानां
स्थानान्तरं स्वर्ग इवावभासे ॥")

मङ्गलद्वाराद्यग्रद्वारम् । इति कोकटादयः ॥ द्वाराग्रे निखातस्तम्भयोरुपरिनिबद्धं नानावस्त्ररत्नादिमयं धनुराकारं यच्चक्रं तत् तोरणमिति बहवः ॥ उपरिखगादियुक्तस्तम्भादिद्वयनिर्म्मितपुरादिबहिर्द्वारम् । इति वाङ्गः ॥ बन्धनमालेति ख्यातं इति केचित् । इत्यमरटीकायां भरतः ॥ ( महादेवे, पुं । यथा, महाभारते । १३ । १७ । ११७ ।

"तोरणस्तारणो वातः परिधीपतिखेचरः ॥")

तोलं, क्ली पुं, ( तुल्यते परिमीयते इति । तुल+कर्म्मणि घञ् । ) तोलकम् । यथा,—

"एकतोलं द्वितोलं वा त्रितोलं वेदतोलकम् ।
इतोऽधिकं नरः कृत्वा प्रायश्चित्तीयते ध्रुवम् ॥"
इत्यागमः ॥

तोलकं, क्ली पुं, ( तोलमेव + स्वार्थे कन् । ) शाणद्वयमानम् । इति शब्दमाला ॥ अशीतिरक्तिपरिमाणम् । तत्तु षोड़शमाषकः षण्णवतिरक्तिपरिमाणश्च । तोला इति भरि इति च भाषा । तत्पर्य्यायः । कोलम् २ द्रङ्क्षणम् ३ वटकम् ४ कर्षार्द्धम् ५ । इति वैद्यकपरिभाषा । कर्षम् ६ । इति लीलावती ॥ (यथा, वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे इहज्वरान्तके ।

"रसं गन्धं तोलकञ्च जातीकोषफले तथा ।"
"किराततिक्तकं बालं तोलकञ्च समाहरेत् ॥")

तोषः, पुं, ( तुष सन्तोषे+भावे घञ् । ) तुष्टिः । इति धरणिः ॥ ( यथा,—

"देवञ्च परमं तोषं जगाम च वसोमया ॥"
इति हरिवंशे । १७३ । १३ ॥

स्वायम्भुवमन्वन्तरगततुषितानां देवानामन्यतमः । यथा, भागवते । ४ । १ । ७ ।

"तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिड़स्पतिः ।
इध्मः कविर्विभुः स्वाह्नः सुदेवो रोचनो द्विषट् ।
तुषिता नाम ते देवा आसन् स्वायम्भुवान्तरे ॥")

तौक्षिकः, पुं, धनूराशिः । इति दीपिका ॥ (यथा, दीपिकायाम् ।

"क्रियतावुरिजितुमकुलीरलेयपाथेययूककौर्पाख्याः ।
तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्थम् ॥")

तौतातिकं, क्ली, ( तुतातेन निर्वृत्तम् । तुतात+"तेन निर्वृत्तम् ।" ५ । १ । ७६ । इति ठक् ।) तुतातभट्टकृतशास्त्रम् । यथा,—

"नैवाश्रावि गुरोर्म्मतं न विदितं तौतातिकं दर्शनम् ।
तत्त्वं ज्ञातमहो न शालिकगिरां वाचस्पतेः का कथा ॥"
इति प्रबोधचन्द्रोदयः । २ । ३ ॥

तौतिकं, क्ली, मुक्ता । इति राजनिर्घण्टः ॥

तौतिकः, पुं, शुक्तिः । इति राजनिर्घण्टः ॥

तौर्य्यं, क्ली, (तूर्य्ये मुरजादौ भवम् । तूर्य्य+अण् ।) तूर्य्ये मुरजादौ भवं शब्दरूपम् । इत्यमरटीकायां भरतः ॥

तौर्य्यत्रिकं, क्ली, ( त्रयोऽंशा यस्य तत् । त्रि+"संख्याया अतिशदन्तायाः कन् ।" ५।१।२२ । इति कन् । तौर्य्योपलक्षितं त्रिकम् । ) नृत्यगीतवाद्यमिदं समुदितं त्रयं नाट्यञ्च । इत्यमरः । १ । ७ । १० ॥ नटसम्बन्धि नृत्यगीतवाद्यमिति त्रयम् । इति तट्टीकासारसुन्दरी ॥ ( यथा, मनुः । ७ । ४७ ।

"मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः ।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥")

विष्णुरहस्ये गीतवाद्यनृत्यफलं यथा,—

"गायन्ते ये प्रकुर्व्वन्ति मम कर्म्मपरायणाः ।
तेषां यद्यत् फलं भूमे ! शृणुष्व गदतो मम ॥
यावन्ति चाक्षराण्येव गीयमाने यशस्विनि ! ।
तावद्वर्षसहस्राणि इन्द्रलोके महीयते ॥
रूपवान् गुणवान् सिद्धः सर्व्ववेदविदां वरः ।
नित्यं पश्यति वै चक्रपाणिं देवं न संशयः ॥
मद्भक्तश्चैव जायेत इन्द्रलोकपथे स्थितः ।
सर्व्वकर्म्मगुणश्रेष्ठस्तथापि मम पूजकः ॥
इन्द्रलोकात् परिभ्रष्टो मम गीतपरायणः ।
प्रसक्तः सर्व्वसंसारान्मम लोकाय गच्छति ॥
यस्तु गायति सुश्रोणि ! कौमुदाश्चैव द्वादशीम् ।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ॥
यस्तु गायति गीतानि मम जागरणे सदा ।
सर्व्वसङ्गात् प्रमुक्तो वै मम लोकाय गच्छति ॥
एतत्ते कथितं देवि ! गायनस्य फलं महत् ।
यस्य गीतस्य शब्देन तरेत् संसारसागरम् ॥*॥
वादित्रस्य प्रवक्ष्यामि तत् शृणुष्व वसुन्धरे ! ।
प्राप्नुवान्मनुजो येन देवेभ्यः समतां स्वयम् ॥
सम्यक्कालप्रयोगेण सन्निपातेन वा पुनः ।
नववर्षसहस्राणि नववर्षशतानि च ॥
कुबेरभवनं गत्वा मोदते वै यदृच्छया ।
कुबेरभवनाद्भ्रष्टः स्वच्छन्दगमनालयः ॥
शय्यादितालसम्पातैर्मम लोकाय गच्छति ॥ * ॥
नृत्यमानस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे ! ।
मनुजा येन गच्छन्ति छित्वा संसारसागरम् ॥
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ।
पुष्करद्वीपमासाद्य स्वच्छन्दगमनालयः ॥
फलं प्राप्नोति सुश्रोणि ! मम कर्म्मपरायणः ।
रूपवान् गुणवान् शूरः शीलवान् सुपथे स्थितः ॥
मद्भक्तश्चैव जायेत संसारपरिमोचितः ॥ * ॥
यस्तु जागरतो नित्यं गीतवाद्येन नर्त्तकः ।
जम्बुद्वीपं समासाद्य राजराजस्तु जायते ॥
सर्व्वकर्म्मसमायुक्तो रक्षिता वै महीपतिः ।
मद्भक्तश्चैव जायेत मम कर्म्मपरायणः ॥"
इति वराहपुराणम् ॥

तौलं, क्ली, ( तुला एव । स्वार्थे अण् । स्वार्थिका अपि प्रत्ययाः क्वचित् प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते इत्युक्तेरस्य क्लीवत्वम् ।) तुला । तुलाराशौ, पुं । तौली । इति ज्योतिषम् ॥

तौलिकः, पुं, ( तुल्या तुलिकया जीवतीति । तुलि+ठक् । ) चित्रकारः । इति शब्दमाला ॥ ( तुलानिर्वृत्ते, त्रि । यथा, सुश्रुते चिकित्सितस्थाने १३ अध्याये ।

"शतं शतं तुलायान्तु सहस्रं दशतौलिके ॥")

तौलिकिकः, पुं, ( तुलिकया जीवतीति । तुलिका+ठक् । ) चित्रकारः । तत्पर्य्यायः । रङ्गाजीवः २ चित्रकृत् ३ । इति हेमचन्द्रः । ३ । ५८५ ॥ तौलिकः ४ । इति शब्दमाला ॥